# SRI SAI BABA NATIONAL DEGREE COLLEGE

**(AUTONOMOUS)**

**Re-accredited at the 'A' Level by NAAC**

**'College with Potential for Excellence' Status by UGC**

**ANANTHAPURAMU (A.P)**

ज्ञान-विज्ञान विमुक्तये
UGC
University Grants Commission

## UGC - Sponsored Two Day National Seminar on

संस्कृतान्ध्रहिन्दीभाषासाहित्येषु रामायणभारतकथाद्वयम - मानवीयमौल्यानि

సంస్కృతాంధ్ర హిందీ భాషా సాహిత్యాలలో రామాయణ, భారత కథలు - మానవతా విలువలు

संस्कृत, आन्ध्र तथा हिन्दी भाषा साहित्यों में रामायण और भारत कथाएँ - मानवीयमूल्य

## ★ Certificate ★

*This is to certify that Mr. / Ms. / Dr.* ASAVADI SUDHAMA VAMSI

*has participated / presented a paper entitled* श्री व्यास महाभारतस्थ यक्षप्रश्नेषु मानवीयमूल्याणि

*in the Two Day National Seminar organised by the Departments of Sanskrit, Hindi and Telugu on 14th & 15th March 2018.*

A.S.V.

**Dr. N. Rasool**
Convener

isbn
978-93-82163-07-7

P. Trisula Pani
**Dr. P.P.V.D.N. Trisula Pani**
Principal & Chairperson

ISBN 978-93-82163-07-7


# चतुर्विधसुभाषितानाधारीकृत्य मानवीयमूल्याणि

(Special References From " ARTHA अर्थः & KAMMA कामः " Based on Mahabharata

**Dr. ASAVADI SUDHAMA VAMSI**
**M.A., M.Phil. Ph.D., NET**
**SENIER LECTURER IN SANSKRIT,**
**MATRUSRI ORIENTAL COLLEGE,**
**JILLILLAMUDI, BAPATLA,**
**GUNTUR - 522113.**
**ANDHRA PRADESH**
**asavadisudhama@gmail.com -9440087823.**

**ASAVADI SASANKA MOULI**
**M.A., NET**
**LECTURER IN HINDI,**
**GDC, DHARMAVARAM**
**ANANATAPURAM- 515671.**
**ANDHRA PRADESH**
**asasankamouli@gmail.com –9441143399**

---




***"भारतस्य प्रतिष्ठे द्वे संस्कृतंसंस्कृति स्तथा"*** इत्यभियुक्तोक्तिमाधारीकृत्य संस्कृतभाषा, भारतीयसंस्कृतिः च अत्यन्त प्राचीनेति निश्चप्रचं वचः। देवता व्यवहार योग्यत्वात् संस्कृतभाषा "***देवभाषा***" इत्यभिप्रधिता। दिव् धातोः द्योतनमित्यर्थः कस्य द्योतनं इत्याकांक्षायाम् **आत्मसंस्कारद्योतनम्** इति समाधेयम्। यतोहि ***"वाण्येका समलङ्करोति पुरुषं या संस्कृताधार्यते", "वाक् वैदोग्ध्री----------- धेनुर्वागस्मान् उपसुष्टुतैतु"*** इत्यादि प्रामाण्यवचनानि संस्कृतभाषायाः, संस्कृतेश्च अविनाभावसम्बन्धः ख्यापयन्ति।

वैदिककालादारभ्य आधुनिककालपर्यन्तं संस्कृतभाषा गङ्गादि पुण्यजीवनदीव आसंसारम् अस्मान् पुणति। संस्कृतसाहित्ये मानवता संपादनाय, संस्थापनाय च मर्हषयः लोकानुग्रहकाक्षिणः यत्नः अकार्षुः। एतादृश महत्वपूर्णायाः संस्कृतेः उज्जीवनाय, परिरक्षणाय बद्धपरिकरास्तौ महाभागौ नित्यस्मरणीयौ भवतः वाम्लीकिव्यासौ।

**चतुर्विधपरुषार्थप्रतिपादक मानवीयमौल्याणि**

प्रथमं मानवीयमूल्यानि इति पदस्य अर्थः विवेचनीयः। मनुपरंपरायामागतः जनः मानवः इत्युच्यते। तत्सम्बद्धानि मूल्यानि मानवीयमूल्यानि भवन्ति। मूल्यशब्दस्यार्थः गुणः अथवा धर्मः इति वक्तुं शक्यते। सत्याहिंसा दयादाक्षिण्यादिभिः गुणैः विशिष्टः सज्जनः, कामक्रोधलोभमोहादिभिः गुणैः युक्तः दुर्जनेति लोके व्यवह्रियते। अत एव वेदोऽपि मानवानां इदं कर्तव्यं इदं न कर्तव्यमिति वेदधर्मानुपदिशन्ति। यथा- सत्यं वद, धर्मं चर, मातृदेवो भव, पितृदेवो भव, आचार्य देवो भव, इत्यादयः। माहाभारतादि ग्रन्थेषु मानवीयमूल्यानि धर्मरूपेण महदा प्रतिपादिताः सन्ति। तत्र वर्णधर्माः, आश्रमधर्माः, स्त्रीधर्माः, सुभाषितविषयाः, आचारव्यवहाराः, लोकव्यवहारज्ञानं, प्रायश्चित्तानि इत्यादयः प्रतिबिम्बिताः विराजन्ते। संस्कृतवाङ्मयं सर्वमपि मानवस्य हितं, समाजश्रेयं, कल्याणं, अभिवृद्धिं च आकाङ्क्षते। सर्वोऽपि जनः धर्मशास्त्रोक्तानां मानवीयमूल्यानां धर्ममार्गानुसरणेन समाजे गौरवप्रदः, पूजनीयः, आदर्शप्रायः, ऋषितुल्यः, महात्मा भवेत्। सः क्रियमाणेषु कर्मसुकौशलं लब्ध्वा विजयं कीर्तिं लब्ध्वा, सप्सन्तानं ऐश्वर्यं च इहलोके प्राप्य परलोके मोक्षं च प्राप्नुयात्।

लौकिक संस्कृतवाङ्मये रामायाण, महाभारतादि इतिहास पुराणेषु काव्यनाटकचम्पूसाहित्ये च बहूनि मानवीयमूल्यानि(धर्माः) (कथानुगुणं सन्दर्भानुगुणं प्रयुक्तानि) सुभाषितरूपेण दरीदृश्यन्ते। महाभारते व्यासेन प्रोक्त चतुर्विधपुरुषार्थ प्रतिपादक सुभाषितान्याधारीकृत्य कानिचिन अत्र विवृण्ते चतुर्विधपुरुषार्थसाधनाय, अहिंसा, सत्यं इत्यादयो प्रधानाङ्गभूताः विद्यन्ते, मानवाः परस्परं प्रेमभावनेन संचरन्तिचेत् मानवता संबन्धाः संस्थापिताः भविष्यन्ति। अहिंसाचरणमपि नाम प्राणिसंरक्षणमपि मानवीयसंबन्धनिबन्धने निदानभूता कथ्यते।

विविध भारतीय संप्रदायेषु अहिंसायाः श्रेष्टता, मान्यता च स्वत एव विद्यन्ते। अहिंसायाः आवश्यकता सर्वेषु ग्रन्थेषु सुष्टुप्रतिपादिता लक्ष्यते। अहिंसा परित्यज्या कोऽपि धर्मप्राचारकः प्रसिद्धो न भवेत्। वेदार्थं प्रतिपादयतन् मनुः अपि स्वग्रन्थे मनुस्मृति नामके अहिंसामेव प्रथमं स्वीकृतवान्।

***अहिंसा सत्यवस्थेयं शौचमिन्द्रियनिग्रहः।***

***एतं सामासिकं धर्मं चातुवर्ण्येऽब्रवीन्मनुः।।(मनुस्मृतिः)***

अत एव स्मृतीनां वेदानुगामितां कवयः अपि तत्र तत्र निरूयन्ति। अहिंसा नाम सर्वभूतेषु वाचिक, कायिक, मानसिकानदाभिद्रोहः। योगसूत्रेषु पतंञ्जलिरपि " **<u>अहिंसा प्रतिष्टायां वैरत्यागः"</u>** (पातंञ्जलयोगसूत्रम्) इति समसूचयति। प्रायः सर्वे एव महात्मनः अहिंसां सेवित्वा लोके पूज्यतां अवापुहुः। न केवलं भरतवर्षे एव सर्वेषु देशेषु अहिंसाचरणं सुप्रसिद्धम्। बौद्धनामपि अहिंसा एव स्वग्रन्थेषु अधिक प्राधान्यं मुधुः।




भगवतः अर्चनादिविधिषु निम्नलिखितां अभियुक्तोक्तिं आगमविदः एवं आविष्कुर्वन्ति-

***अहिंसा प्रथमं पुष्पं, इन्द्रियाणां च निग्रहः।***

***क्षान्ति पुष्पं, दया पुष्पं, ज्ञानपुष्पं अथः परम्।***

***तपः पुष्पं, सत्यपुष्पं, भावपुष्पमथाष्टमम्।।***

पुष्पापचय समयेऽपि जागरूकता विधातव्या इति अनेन ज्ञाप्यते।

श्रीमन्महाभारते अगस्थ्यः होमादीनां करण समये संभारभावे दुर्भिक्षसमये यागादीनां होमादीनां च आवश्यकर्तव्यत्वात् वस्तुसामग्र्याभावेऽपि मानसिकया भवनया तान् सर्वान् प्रकल्प आचरितवानेति दृष्यते। अतः परोक्ष विधिना अहिंसा निरूपिता अवेद्यते।

***अहिंसा सत्यवचनं ब्रह्मचर्यमकल्पयता।***

***अस्थेयमिति पञ्चैते यमावै परिकीर्तिताः।।***

अत एव उन्नता वदन्ति यत्-

***अहिंसा परमोधर्मः, तथाऽहिंसा परं तपः।***

***अहिंसा परमं ज्ञानम्, अहिंसा परमार्जवम्।।***

महाभारते चतुर्विधपुरुषार्थप्रतिपादने व्यासः धर्मसामान्यलक्षणम् एवं वदति–

***धृतिः क्षमा दमो स्तेयं शौचमिन्द्रियनिग्रहः।***

***धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।(म.भा)***






**"अर्थः"**

***यश्च धर्मकामरूपपुरुषार्थानुष्ठानद्वारा ऐहिकामुष्मिकोभयफलदायको भवति सोऽर्थेति विदुषां अभिप्रायः।***

***न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्।***

***विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति।।***

***(म.भा.आदि.अ-139 श्लोक-62)***

कणिकः धृतराष्ट्रं प्रति नीतिमार्गमुपदिशन्नेवं वदति इत्यत्र विश्वासो राज्ञां प्राणतुल्यः। राज्ञां कार्यकलापः विश्वस्तानामुपरि वर्तते। विश्वास एव विभवानां मूलकारणं भवति। गजस्य स्वपरिवारे इवात्रापि विश्वासः समृद्धिहेतुः। सिंहस्य मृगाधिपत्ये सिद्धेऽपि विश्वासाभावेनैव परिवारसिद्धिं न दृश्यते। समृद्ध्यभिलाषी, आयुष्कामः, सुखाभिलाषी च जनः(राज) स्वं विहाय इतरं न विश्वसेत्।

सर्वथाऽविश्वासे संव्यवहारः विनष्टभावमाप्नोति। यावत् संव्यवहारस्य हानिर्नभवेत् तावदेव विश्वासं प्रदर्शयेत्। यावता विश्वासेनेतरः विश्वसेत् तावतैव विश्वस्तः आत्मानं निरूपयेत्। अविश्वासः सदा तथा कर्तव्यः यथा च कार्यहानिर्न। अनुजीविचित्तानामनित्यत्वात्, कार्यविलक्षणतया च तानि विलक्षतामुत्पद्यन्ते, तत्रापि राज्ञा तत्तदभिप्रायवता अवलोकनीयम्। अनुजीविनः मित्रत्वादिकार्थे चित्तं स्निग्धं मृदु च स्यात्। शास्त्रवादिकार्ये कठिनं स्यादतः राजा एकाग्रमनास्सन् तिष्ठेत्।

विदुरेणोक्ता धृतराष्ट्रं सन्मार्गं प्रवेशयितुं नाचरिता सती अतीव द्वेषमेव तस्योपरि जनयितुं समर्थाऽभूत्। द्रोणपर्वणि धृतराष्ट्रोऽपि सञ्जयमेवं वदति– न मे अर्जुनकृष्णसात्वतधृष्टद्युम्नेभ्यः भयं, किंतु भीमसकाशादेवेति।

अत एव उद्योगपर्वणि विदुरः धृतराष्ट्रमुद्धिश्य अष्टत्रिंशत्तमाध्याये नीतिं कथयन् अविश्वस्ते भीमे विश्वासो न कार्य इति कथितवान्। विदुरवाक्यमविगणय्य पुत्रे प्रेमप्रदर्शनेन तस्य महान् पुत्रशोकः संजातः।

तथैव शान्तिपर्वणि शान्तनवोऽपि धर्मराजाय नीतिमार्गमुपदिशन् परेषामात्मनि विश्वासं जनयेत्, परान् न विश्वसेत्, पुत्रेष्वपि विश्वासं न प्रदर्शयेत् इति वदति।

***कालो वा कारणं राज्ञो राजा वा कालकारणम्।***

***इति ते संशयो माभूद्राजा कालस्य कारणम्।।***

***(म.भा.शान्ति.अ-69.श्लो-79)***

पार्थिवेन विशेषतया किं करणीयमिति प्रश्नस्य उत्तररूपेण भीष्मः धर्मजमेवं वदति। कश्चिद्राजा सिंहासनमाक्रामति स्वपरिवारे अधिकारं सम्यक् स्थापयति। दण्डनीत्या प्रजानां राज्ञां च महदैश्वर्यं प्रभवति। दण्डनीतिवैफल्येन राजा निर्वीर्यो भवेत्। कृतादीनां युगानां ये ये विशेषाः तान् प्रजार्थं कल्पयितुं राजा समर्थः उच्यते। अतिक्रान्तमपि कालं स्वप्रभावेन जगति प्रतिष्ठातुं राजा शक्तो भवति। युगधर्मान् प्रवर्तयितुं राजैव कारणम्। ***यथा राजा तथा प्रजा*** इत्यनेन राजा धर्मवर्ती चेत् प्रजा अपि धर्मवर्तिनो भूत्वा राज्ञः कालकर्तुत्वं निरूपयन्ति। ऋतवः, ग्रीष्मादयः न प्रवर्तते चेत् सस्यसमृद्धिः न भवति। कालः जनानामावश्यकः जनोपयोगित्वेनैव कालस्य प्रामुख्यं राज्ञामुपरि वर्तते।

एवं राजा कालस्यापि खलीनं बन्धितुं समर्थो भवति। राजा विशिष्टस्य कालस्य कारणमिति सोमदेवनीतिसूत्राणि आवेदयन्ति। राज्ञोऽन्यायकरणं, समुद्रस्य मर्यदालंघनं, आदित्यस्य तिमिरपोषणं, मातुः स्वापत्यभक्षणमिति कलिकालविजृम्भितानीति च सोमदेवः। एतत्सर्वं राज्ञैव निष्पद्यते, अतोऽधर्मपरे राज्ञि को नाम अधर्मपरः न भवति।

राज्ञः न्यायपालने प्रजानां ईतिबाधाः न प्रभवन्ति। लोकपालानां वपुर्धत्ते राजा इत्यनेन मध्यमं लोकपालं व्यप्रदिशन्ति तं, अपि च स्वयं लोकपाला अपि वृष्ट्यादिना तमनुसरन्ति। व्यासः महाभारते शान्तिपर्वे राज्ञः युगरूपमेवं निरूप्यते। यथा-

***राजा कृतयुगस्रष्टा त्रेताया द्वापरस्य च।***

***युगस्य च चतुर्थस्य राजा भवति कारणम्।।***

राजवृत्तानि सर्वाणि राजैव युगमुच्यते इति। नीलकण्ठाचार्योऽपि तस्मिन्नध्यायव्याख्याने एवं निगदति। यथा – दण्डनीत्याः सकाशात् राज्ञां प्रजानां च यत् महाभाग्यं तच्छृणु। तत्र दण्डनीत्या राजा स्वर्गं प्राप्नोति। कृतादीन् जनयति तावुभौ च प्रजानां क्षेमं जनयतः इति।

***कर्मणा कालयुक्तेन तथेदं चेष्टते जगत्*** इत्यनेन कालं कर्मापि च काल एव भवतीति ज्ञातुं शक्यते। ***शान्तास्यापि तव हिंस्रे कर्मण प्रवृत्तिरिति*** कालस्यैवै तन्माहात्म्यमित्यर्थः। अनेन वक्तुं शक्यते यत् ***राजा कालस्य कारणं भवति, न तु कालो राज्ञः कारणम्***।

**"कामः"**

***इन्द्रियगोचरप्राप्ते इष्टे विषये श्रूयमाणे स्मर्यमाणे वा अनुभूते सुखहेतौ या गर्धिः तृष्णा स कामः*** इति।

***शत्रोरपि गुणा ग्राह्या दोषा वाच्या गुरोरपि।***
***सर्वथा सर्वयत्नेन पुत्रे शिष्ये हितं वदेत्।।***

***(म.भा.विरा.अध्य-51, श्लो-15)***

अश्वत्थामा क्षमामभ्यर्थमानं भीष्ममेवं जगाद। हे भरतर्षभ भाषिता एते शत्रोर्गुणाः केवलरोषेण गुरुणा। सर्वेषां हितकांक्षिणां राज्ञः शत्रो गुणाः वाच्या एव अत्सत्पक्षदोषाः तथैव कीर्तनीया एव। कर्णः केवलं क्षत्रधर्ममालम्ब्य वदन्नपि तस्मिन् कालज्ञता नास्ति, यतः सः महत्कार्ये समुपस्थिते सर्वान् विनिन्दति, तृणीकरोति च।

दुर्योधनः कृपस्य शिष्यः, कर्णः शिष्यसदृशः, पुत्र सदृशश्च। राजश्रेयोभिलाषी हितमेव वदेत्, तन्मनोहारि वा न वा इति स न चिन्तयति।

लोके द्विविधवचोराशिः वर्तते, एकं हितं, द्वितीयं मनोहारि। कर्णस्तु केवलं क्षत्रधर्ममाश्रित्य भवतः मनोहारि वचः वदति, वयं तु सर्वमालोच्य हितं वदामः। अतः युक्तायुक्तं भवानेव विचारयतु।

बालस्य पठनविधिः तात्कालिकक्षमकर अपि अन्ते सुखं तस्य जनयति। बालस्य क्रीडासक्तिः निर्विरामा यदि मनोहार्यपि भविष्यति दुःखदायिका भवति।

अतः सर्वथा हितकथनमेव श्रेयः। अत एव भारविरपि किरातार्जुनीये महाकाव्ये ***हितं मनोहारि च दुर्लभं वचः*** ***(किरातार्जुनीयः)*** इति। अतः मद्वचः हितमेव, भवन्मनोहारि न भवति चेत्याज्यमवेति अश्वथामा निगदति।

***मनसा निश्चयं कृत्वा ततो वाचाभिधीयते।***

***क्रियते कर्मणा पश्चात् प्रमाणं मे मनस्ततः।। (म.भा.वन.अध्य-294, श्लो-28)***

कथासन्दर्भः यदस्ति- सावित्री यदा सत्यवता सह विवाहमभिलषति तदा तत्पित्रा निवारिता सा पितरमेवं वदति। इत्यत्र त्रिकरणशुद्ध्यात्मकं कर्म सत्फलमेव ददाति, एतेषु मनः एव प्रधानमिति सा कथ्यति।

अश्वपतेः पुत्री सावित्री, तस्याः प्रदानकाल आगतः। तस्याः गुणैः भीताः(सद्गुणैः) वराः तां पार्थितुं नोत्सहन्ते। तदा पिता अश्वपति तामाहूय मन्त्रिभिस्सह गत्वा वरं स्वयमन्विच्छेति आदिदेश। सा तथा कृता सती सदृशं वरं मनसा लेभे। प्रतिनिवृत्ता सा स्वपितुः सभायां नारदेन सहोपविष्टं मद्राधिपं ददर्श। नारदेन पृष्टा सा मनसा सत्यवन्तं वृणोऽस्मीत्यवोचत्। सः क्षीणायुरिति तेन नारदेन कथितापि तमेव उद्वाहं कर्तुं गतवती आसीत्।

सा सभामध्ये सत्यवन्तं वरत्वेन स्वीकृतवत्यस्मि मनसा इति प्रकटितवती अभूत्। नारदः यदा सः क्षीणायुरिति वदति तदा पित्रा अन्यं वरं वस्य इति प्रार्थितापि सा तिरस्कृतवत्यभूत्।

यदि सा पितृवचनानुसारेण अन्यं वरं वृणोति तदा सभामध्ये स्वमनोनुकूलं अभिप्रायं उक्तवत्याः तस्याः चित्त चाञ्चल्यमेव व्यक्तीभवेत्।

तदा तस्याः उपरि प्रथमनिर्णयभङ्गदोषोऽप्यापतति। यतः साक्षाद्देवर्षेः समक्षे सा उक्तवत्यभूत्। पातकयुक्ता च सा भवेत्।

***कायेन कुरुते पापं मनसा संप्रधार्य च।***

***अनृतं जिह्वया च त्रिविधं कर्म पातकम्।।***

एवं सा करोति चेत् अन्योन्यासङ्गतिः त्रयाणाम् वाक्कायमनसां संगच्छते। अत एव सा क्रियते कर्मणा पश्चादिति जगाद। मनसा निर्णयः, वाचा उद्घाटनम् चात्र कृतम्। कर्मैव अत्र अवशिष्टमिति निवेदयति।

ये तु मनसा प्रथमं निश्चयं कृत्वा उच्चैःजल्पन्ति ते क्रियास्वपि प्रवर्तयन्ति। नान्यस्मिन् पुरुषे सन्ति ये सत्यवति वै गुणाः इति नारदोक्तिरपि तस्याः निश्चयं दृढं चकार।

येषां मनोनिश्चयः गाढः भवति ते कष्टतरमपि कार्यं अनायासेनैव साधयन्ति। भर्ता सकृदेव वरणीयः सगुणोऽपि निर्गुणोऽपि सच्छीलवतीनां स्त्रीणाम्। तव भर्तारं त्वमेव वृणु इति पितृवचनेन तस्याः पितृवाक्यपालनदोषोऽपि नास्ति। मनोवाक्कायशुद्ध्या यः कृत्यमाचरति सः तस्मिन् कृत्ये सफलतामेवोपगच्छतीत्यावेदयति तस्याः निर्णयः। स एव निर्णयः उत्तमः, प्रशस्थतमश्च इति वक्तुं शक्यते।


Sri Shankaracharya

शास्त्रादीनां पाण्डित्यं प्रामाण्यमपि पुनर्जन्मनः अस्त्येव। बालानां अपठितेषु शास्त्रेषु पाण्डित्यं, जन्मान्तरविषयादिप्रकटनं च आत्मनः पुनरुत्पत्तिं द्रढयति। चार्वाकदर्शनमपहाय सर्वे दर्शनानि पूनर्जन्मसिद्धान्तमङ्गीकुर्वन्ति। श्रीकृष्णः अर्जुनमेवं प्रबोधयति। मयैवेते पूर्वमेव निहितेति वक्ष्यामि। एषां मरणाख्येऽर्थे त्वदुयोगं विनापि अवश्यं भाविनि विषये न त्वं शोचितुमर्हसि। अस्तवात्मनोऽशोच्यत्वं तथापि इष्टदेह वियोगजः शोकः भवत्येवेति नीलकण्ठाचार्याः वदन्ति। एवं व्यासेन महाभारते पुरुषार्थप्रतिपादिक सुभाषितान्याधारीकृत्य मानवीयमौल्यणि प्रतिबोधितान्यिति वक्तुं शक्यते।

उपयुक्तग्रन्थाः –


1. महाभारतम्
2. पातंञ्जलयोगसूत्राः
3. श्रीमद्भगवद्गीता
4. मनुस्मृतिः
5. किरातार्जुनीयम्
6. गौतमधर्मसूत्राः
7. महाभारतसूक्तिसुधाकरा

**यस्यस्मरणमात्रेण जन्मसंसार बन्धनात्।**

**विमुच्यते नमः तस्मै विष्णवे प्रभविष्णवे।।**